(ख) सम्प्रदान में चतुर्थी विभक्ति

(vii) (क) करण में तृतीया विभक्ति
(ख) अधिकरण में सप्तमी विभक्ति

(viii) (क) 'सह' के योग में तृतीया विभक्ति
(ख) सम्बन्ध में षष्ठी विभक्ति

(ix) (क) 'सह' के योग में तृतीया विभक्ति
(ख) अपादान में पंचमी विभक्ति

(x) (क) सम्बन्ध में षष्ठी विभक्ति
(ख) अधिकरण में सप्तमी विभक्ति

(xi) (क) 'समम्' के योग में तृतीया विभक्ति
(ख) कर्म में द्वितीया विभक्ति

(xii) (क) कर्म में द्वितीया विभक्ति
(ख) 'सह' के योग में तृतीया विभक्ति

(xiii) (क) 'सह' के योग में तृतीया विभक्ति
(ख) उत्पत्तिस्थान में पंचमी विभक्ति

(xiv) (क) उत्पत्ति स्थान में पंचमी विभक्ति
(ख) 'प्रयोजन' के योग में तृतीया विभक्ति

(xv) (क) भय के हेतु में पंचमी विभक्ति
(ख) करण में तृतीया विभक्ति

(xvi) (क) सम्प्रदान में चतुर्थी विभक्ति
(ख) भय के हेतु में पंचमी विभक्ति

(xvii) (क) क्रोध के पात्र में चतुर्थी विभक्ति
(ख) विकार सूचित करने वाले अंग में तृतीया विभक्ति।

●●

## पाठ–11 विशेषण–प्रकरणम्

1. (i) (ख), (ii) (ख), (iii) (ग)।
2. (i) श्वेत, (ii) द्वितीये, (iii) रक्त
3. (i) महान् ।
   (ii) श्रेष्ठतमः ।
   (iii) विशेषण– लघुकायः, विशेष– पिपिलिका
   (iv) शोभनौ ।
   (v) बालिका पदस्य ।
   (vi) श्रेष्ठतमः ।
   (vii) विशुषण– लघु, विशेष्य– काव्यम् ।
   (viii) एकः ।
   (ix) धनम् ।

●●

## पाठ–12 अनुवाद–प्रकरणम्

1. (1) मोहनः धावति ।
   (2) बालकः पठति।
   (3) राधा भोजनं पचति ।
   (4) छात्रः पश्यति ।
   (5) श्रृगालः आगच्छति ।
   (6) सः प्रश्नं पृच्छति ।
   (7) कपिः फलं भक्षयति ।
   (8) शिशू पठतः ।
   (9) ते धावन्ति ।
   (10) बालकाः चित्रं पश्यन्ति ।
   (11) जननी कथां कथयति।
   (12) मोहनः सोहनः च पत्रं लिखतः ।
   (13) छात्रौ किं पश्यतः?
   (14) बालकौ पाठं पठतः ।
   (15) सिंहः वने धावति ।
   (16) गजः ग्रामं गच्छति ।
   (17) सीता वनं गच्छति ।
   (18) रामः श्यामः च हसतः ।
   (19) बालकः पाठं स्मरति ।
   (20) कृषकः अजां नयति।
2. (1) त्वं पाठं पठसि ।
   (2) त्वं किं पश्यसि ?

(3) त्वं कदा गच्छसि ?
(4) युवां चित्रं पश्यथः ।
(5) युवां पत्रं लिखथः ।
(6) यूयं अत्र आगच्छथ ।
(7) यूयं प्रातः धावथ ।
(8) युवां फलं भक्षयथः ।
(9) त्वम् अत्र आगच्छसि ।
(10) यूयं कुत्र गच्छथ ?
(11) युवां पाठं स्मरथः।
(12) त्वं किं पिबसि ?

**3.** (1) अहं दुग्धं पिबामि ।
(2) आवां कुत्र गच्छावः ?
(3) वयं कथां कथयामः ।
(4) अहं मयूरं पश्यामि ।
(5) आवां जलं पिबावः।
(6) वयं क्रीडाक्षेत्रं गच्छामः ।
(7) अहं किं भक्षयामि ?
(8) आवां किं पचावः ?
(9) वयं प्रश्नं पृच्छामः ।
(10) आवां किं लिखावः?
(11) आवां किमर्थं हसावः ?
(12) अहं कदा पुस्तकानि आनयामि ?

**4.** (1) सः ग्रामम् अगच्छत् ।
(2) विप्रः गृहम् अगच्छत्।
(3) सः स्नानम् अकरोत् ।
(4) रामः मोहनः च अपठताम्।
(5) तौ उद्यानम् अगच्छताम्।
(6) सीता जलम् आनयत् ।
(7) बालिका भोजनम् अभक्षयत् ।
(8) किं तव सहोदरः अत्र आगच्छत् ?
(9) यूयं कुत्र अगच्छत ?
(10) सीता एकं पत्रम् अलिखत् ।
(11) नृपः अरक्षत् ।
(12) सः प्रसन्नः अभवत् ।

**5.** (1) ब्रह्मदत्तः गमिष्यति ।
(2) मोहनश्यामः पत्रं लेखिष्यति ।
(3) बालकाः पाठं पठिष्यन्ति ।
(4) त्वं पाठं स्मरिष्यसि ।
(5) सीता वनं गमिष्यति ।
(6) ते चित्रं द्रक्ष्यन्ति ।
(7) प्रमिला भोजनं पक्ष्यति ।
(8) युवां दुग्धं पास्यथः ।
(9) छात्राः क्रीडाक्षेत्रे धाविष्यन्ति।
(10) अहं किं करिष्यामि ?
(11) आवां तत्र पठिष्यावः।
(12) यूयं किं भक्षयिष्यथ ?

**6.** (1) राधा पाठं पठतु ।
(2) छात्रः भोजनं करोतु ।
(3) नृपः धनं यच्छतु ।
(4) ईश्वरः जीवनं रक्षतु ।
(5) वयं चित्रं पश्याम ।
(6) त्वम् उद्याने धाव ।
(7) ते पुष्पाणि नयन्तु ।
(8) तौ जलं पिबताम् ।
(9) राधा भोजनं पचतु ।
(10) युवां पाठं पठतम् ।
(11) ते प्रश्नं पृच्छन्तु ।
(12) वयं सर्वे प्रसन्नः भवाम ।

**7.** (1) अध्ययनं कुरु।
(2) धूम्रपानं मा कुरु।
(3) जलपानं कुरु ।
(4) प्रातः भ्रमणं कुरु ।
(5) स्वच्छं जलं पिब ।
(6) देशस्य रक्षां कुरु।
(7) स्वामिभक्तः भव।
(8) कर्तव्यस्य पालनं कुरु ।
(9) सदा सत्यं वद ।
(10) गुरुजनानाम् आज्ञापालनं कुरु ।
(11) मित्रैः सह कलहं मा कुरु।
(12) मदिरापानं मा कुरु।
(13) द्यूतं मा क्रीड ।
(14) सज्जनानां संगतिं कुरु।

**8.** (1) सः पाठं पठेत् ।
(2) त्वं तत्र गच्छेः ।
(3) सीता भोजनं पचेत् ।
(4) सः पत्रं लिखत् ।
(5) त्वं क्रोध न कुर्याः ।
(6) त्वं पाठं स्मरेः।
(7) अहं त्वया सह भवेयाम्।
(8) जननी कथां कथयेत् ।
(9) वयं प्रतिदिनं विद्यालयं गच्छेम ।
(10) ते ग्रामं न गच्छेयुः।
(11) त्वं स्वच्छं जलं पिबेः ।
(12) यूयं चित्राणि पश्येत ।

## पाठ–13 वाच्यपरिवर्तनम्

**1. (क)** (i) छात्रेण **पुरस्कारः** गृह्यते।
(ii) छायाकारेण **छायाचित्रं** रच्यते।
(iii) मया **लेखः** लिख्यते।

**(ख)** (i) वृक्षैः फलानि **दीयन्ते।**
(ii) छात्रैः **गुरवः** नम्यन्ते।
(iii) **पापिना** पापं क्रियते।

**(ग)** (i) विद्यया विनयः **दीयते।**
(ii) मया **पिता** सेव्यते।
(iii) **त्वया** अहम् पृच्छ्ये।

**(घ)** (i) **नृपेण** शत्रुः हन्यते।
(ii) सर्पैः **पवनः** पीयते।
(iii) वृद्धेन वेदाः **पठ्यन्ते।**

**(ङ)** (i) त्वया कथा **श्रूयते।**
(ii) **मया** मोहः त्यज्यते।
(iii) रामः **जनकं** प्रणमति।

**2.** (i) मया ग्रामः गम्यते।
(ii) सीता पुस्तकं पठति।
(iii) शीला हसति।
(iv) तेन गीता पठ्ये।
(v) अहं नाटकं पश्यामि।
(vi) त्वया कुत्र स्थीयते।
(vii) सः भोजनं पचति।
(viii) मया वृक्षः दृश्यते।
(ix) तेन पत्रं पठ्यति।
(x) बालकः नाटकं पश्यति।
(xi) तेन प्रश्नः पृच्छयते।
(xii) कृष्णः कसं दृहनन्ति।
(xiii) शिष्यैः गुरुः प्रणम्यते।
(xiv) गोपालः पाठं पठति।
(xv) गोपालेन अजा ग्रामं नीचते।
(xvi) नृपः दुष्टं हन्ति।
(xvii) अहं लेखं लिखामि।
(xviii) तेन पुस्तकानि पठ्यन्ते।
(xix) प्रियङ्काया लेखः लिख्यते।
(xx) त्वम् गच्छसि।
(xxi) वानरैः वृक्षः आरुह्यते।
(xxii) अहं वेदं पठामि।
(xxiii) अस्मानिः प्रातः भ्रम्यते।
(xxiv) भगिनी वस्त्रं प्रक्षालयतिं।
(xxv) अहं नगरं गच्छामि।

## पाठ–14 अशुद्धि–संशोधनम्

**1.** 1. (अ), 2. (ब), 3. (स)
**2.** (i) भाषासु, (ii) ब्रह्मसमाजेन, (iii) रमायाः, (iv) सम्मानाय।
**3. (i)** (क) रामात् श्यामः चतुरतरः ।
(ख) सा स्त्री कलावती विद्यते ।
(ग) सूर्ये अस्तंगते स आगतः ।
(घ) अस्माकं राष्ट्रं बलवत् विद्यते ।
(ङ) अस्यां कक्षायां अनेके छात्राः सन्ति ।
**(ii)** (क) तं विना अहं किं करोमि ?
(ख) ततः राज्ञा उक्तम् ।

(ग) रामात् श्यामः लघुतरः विद्यत।
(घ) तत्र अनेके नेतारः सन्ति ।
(ङ) छात्रेषु गोपालः बुद्धिमत्तमः ।
**(iii)** (क) वृक्षेभ्यः पत्राणि पतन्ति ।
(ख) उपाध्यायाद् व्याकरणं पठति।
(ग) भोजनाद् अनन्तरं शतपदं गच्छेत् ।
(घ) तिलेभ्यो माषान् प्रतियच्छति ।
(ङ) क्रोशं कुटिला नदी ।
(च) ग्रामं परितो वनम् अस्ति।
(छ) बालकः आसन्दिकाम् अधितिष्ठति ।
(ज) ग्रामम् अजां नयति।
(झ) मरणात् कस्य भयं नास्ति।
(ण) ग्रामस्य दक्षिणतः विद्यालयोऽस्ति ।
**(iv)** (क) कामात् क्रोधोऽभि- जायते।
(ख) रामः धर्मात् न प्रमाद्यति ।
(ग) त्वं कस्यां कक्षायां पठसि ?
(घ) गृहाद् आराद् विद्यालयोऽस्ति ।
(ङ) शैशवात्प्रभृति पालिताम् ।
(च) नगराद् बहिः वनानि सन्ति ।
(छ) रामः सीता च वनं गच्छतः ।
(ज) रमेशः कदा आगच्छति ?
(झ) ज्ञानाद् ऋते सुखं नास्ति।
(ण) कविषु कालिदासः श्रेष्ठः ।

## पाठ–15 पर्यायवाची एवं विलोम शब्दः

1. **(i)** (स), **(ii)** (अ), **(iii)** (द), **(iv)** (अ)।
2. (i) मही, (ii) अचलः, (iii) अम्बरम्, (iv) अम्बु।
3. (i) भूमिः, अवनिः, मही, वसुन्धरा।
   (ii) मरालः, चक्रांग, कलहंसः, नीरक्षीर-विवेचकः।
   (iii) तातः, जनकः, प्रसवितृ, जनयितृ।
   (iv) नौकरः, दासः, किंकरः, अनुचरः।
   (v) गेहं, वेश्मन्, सदनं, निकेतनम।
4. (i) वनम् (ii) देवताः (iii) दुष्टः (iv) पक्षी (v) वृक्षः।
5.

| (क) | (ख) |
|---|---|
| (i) उन्नतिः | (य) अवनति |
| (ii) प्राचीनः | (द) अर्वाचीन |
| (iii) अनुकूलः | (स) प्रतिकूलः |
| (iv) ज्येष्ठः | (अ) कनिष्ठ |
| (v) कृतज्ञः | (ब) कृतघ्नः |

# पाठ-1 पत्र-लेखनम्

1. सेवायाम्

**श्रीमन्तः** प्रधानाध्यापक महोदयाः,

रा. उ. प्रा. **विद्यालयः**,

भरतपुरम् ।

**विषयः**– दिनत्रयस्य अवकाशार्थं प्रार्थना-पत्रम् ।

महोदयः

सविनयं **निवेदयामि** यद्याहं शीतज्वरेण **पीडितोऽस्मि।** अस्मात् कारणात् **दिनत्रय** यावत् विद्यालये **उपस्थातुं** न शक्नोमि। अतः **प्रार्थये** यत् दि. 20-7-20_ _ ई. तः 22-7-20_ _ दिनत्रयस्य अवकाशं **स्वीकृत्य** मामनुगृहीष्यन्ति मां **भवन्तः** ।

दिनांकः 20-7-20_ _ ई. भवदाज्ञाकारी **शिष्यः**

सुदर्शनः

कक्षा 8 (जी)

2. सेवायाम्,

श्रीमन्तः प्रधानाध्यापक महोदयाः,

महाराजा बदनसिंह उ. प्रा. विद्यालयः,

भरतपुरम् ।

**विषयः**– शिक्षणशुल्कमुक्तये प्रार्थना-पत्रम् ।

महोदयः,

सविनयं प्रार्थये यदहं श्रीमन्तः विद्यालये अष्टम् कक्षायाः छात्रोऽस्मि। मम पितुः आर्थिकस्थितिः शोचनीयाऽस्ति। मम पिता वृद्धोऽस्ति, प्रतिदिवसं कार्येण पञ्चाशद् रुप्यकाणाम् अर्जनमेव भवति । तेन परिवारस्य पालन-पोषणञ्च कथमपि भवितुं न शक्नोति । अतः अहं विद्यालयस्य शिक्षणशुल्कं प्रदातुम् असमर्थोऽस्मि । गतवर्षे मम शिक्षणशुल्क-मुक्तिः स्वीकृता आसीत् । सप्तम कक्षायाः परीक्षायाम् अहं प्रथमश्रेण्याम् उत्तीर्णोऽभवम्।

अतः पुनः निवेदनमस्ति यत् भवन्तः अध्ययने मम रुचिं विलोक्य मह्यं शिक्षण-शुल्कात् मुक्तिं प्रदाय अनुग्रहीष्यन्ति।

दिनांकः 5-7-20_ _ ई. भवदाज्ञाकारी शिष्यः

सुरेशचन्द्रः

कक्षा 8 (स)

3. सेवायाम्

श्रीमन्तः प्रधानाचार्यमहोदयाः,

राजकीयः उच्च माध्यमिक विद्यालयः

जोधपुरम् ।

**विषयः**–दिनद्वयस्य **अवकाशार्थं** प्रार्थनापत्रम् ।

**महोदयः,**

सविनयं निवेदनम् **अस्ति** यत् मम ज्येष्ठभ्रातुः **पाणिग्रहणसंस्कारः** 28-11-20_ _ दिनाङ्के **निश्चितः।** एतत् कारणात् दिनद्वयं यावद् अहं स्वकक्षायामुपस्थातुं न **शक्नोमि** ।

अतः **निवेदनमस्ति** यत् 28-11-20_ _ दिनाङ्कतः 29-11-20_ _ दिनाङ्क पर्यन्तं **दिनद्वयस्य** अवकाशं स्वीकृत्य माम अनुग्रहीष्यन्ति **श्रीमन्तः**।

सधन्यवादम् ।

दिनाङ्कः 28-11-20_ _ भवदीयः शिष्यः

भारतः शर्माः

(अष्टम् कक्षा)

4. **सेवायाम्**

श्रीमन्तः **प्रधानाध्यापक महोदयाः,**

राजकीयः उच्च प्राथमिक विद्यालयः,

जयपुरम् ।

**विषयः**-चरित्र-प्रमाण-पत्र-प्राप्त्यर्थं प्रार्थना-पत्रम् ।

महोदयाः,

सविनयं **निवेदनम्** अस्ति यत् अहम् आंग्ल **भाषयाः** वाद-विवाद **प्रतियोगितायां** भागं ग्रहीतुम् इच्छामि । एतत् **कारणात्** चरित्र-प्रमाण-**पत्रस्य** आवश्यकता **वर्तते।** अतः प्रार्थना अस्ति यत् मह्यं चरित्र-प्रमाण-पत्रं **प्रदाय** अनुग्रहीष्यन्ति **भवन्तः ।**

सधन्यवादम् । भवदाज्ञाकारी शिष्यः

दिनांकः 15-8-20_ _ अनूपः

(अष्टम् कक्षा)

5. **सेवायाम्**

श्रीमन्तः प्रधानाध्यापकमहोदयाः

**राजकीयः** उच्चप्राथमिकविद्यालयः

अजयमेरूः ।

**विषयः**–दिनत्रयस्य **अवकाशार्थं** प्रार्थना-पत्रम् ।

महोदयः,

**सविनयं** निवेदनम् अस्ति यत् **मम माता** गतदिवसात् शीतज्वरेण **पीड़िता** अस्ति । एतस्मात् कारणात् अहं विद्यालयम् आगन्तुं न शक्नोमि ।

कृपया 8-10-20_ _ दिनाङ्कतः 10-10-20_ _ दिनाङ्क **पर्यन्तं** दिनत्रयस्य अवकाशं **स्वीकृत्य माम्** अनुग्रहीष्यन्ति श्रीमन्तः ।

सधन्यवादम् । भवदाज्ञाकारी शिष्यः

दिनांकः 8-10-20_ _ रमनः

(अष्टम् कक्षा)

6. सेवायाम्

श्रीमन्तः प्रधानाचार्यमहोदयाः

राजकीयः उच्चमाध्यमिकविद्यालयः,

**दौसानगरम्** ।

**विषय- स्थानान्तरण**-प्रमाण प्रत्रं प्राप्तुं प्रार्थना-पत्रम् ।

महोदयः,

सविनयं निवेदनम् अस्ति यत् मम पिता अत्र **लिपिकः** अस्ति । अधुना तस्य स्थानान्तरणं **भरतपुरम्** अभवत्। मम **परिवारः** मम पित्रा सह भरतपुरं गमिष्यति । अहम् अस्मात् **विद्यालयात्** सप्तकक्षाम्, उत्तीर्णवान्, अष्टकक्षायाम् अहं भरतपुरे **पठिष्यामि** । अतः मह्यं स्थानान्तरण-प्रमाण-प्रत्रं **प्रदाय** अनुग्रहीष्यन्ति भवन्तः इति ।

सधन्यवादम् । **भवदाज्ञाकारी** शिष्यः

दिनांकः 15-7-20_ _ रामकुमारः

(अष्टम् कक्षा)

7. सेवायाम्

श्रीमन्तः **प्रधानाचार्य** महोदयाः,

राजकीयः उच्चमाध्यमिक विद्यालयः,

जोधपुरम् ।

**विषयः- क्रीडायाः** सम्यग् व्यवस्थायै प्रार्थना-पत्रम् ।

महोदयः,

सविनयं निवेद्यते यदस्माकं **विद्यालये** क्रीडायाः व्यवस्था भद्रतरा न **वर्तते** । अध्ययनेन समम् एव क्रीडनमपि **अस्मभ्यं** रोचते । अतः क्रीडायाः सम्यग् व्यवस्थां **विधाय** अस्मान् अनुग्रहणन्तु **श्रीमन्तः** ।

सधन्यवादम् । भवदाज्ञाकारी शिष्यः

दिनांकः 25-7-20_ _ हरीशः

(अष्टम् कक्षा)

(कक्षा 8)

8. सेवायाम्

श्रीमन्तः प्रधानाध्यापक महोदयाः,

रा. उ. प्रा. विद्यालयः, श्रीकरनपुर ।

**विषयः-** विद्यालये **स्वच्छतायाः** व्यवस्थायै प्रार्थना-पत्रम्।

महोदयाः,

सविनयं निवेदयामो यद् **अस्माकं** विद्यालये सम्प्रति अस्वच्छतायाः **साम्राज्यं** वर्तते । अस्मिन् **वातावरणे** छात्राः शिक्षकाश्च रोगग्रस्ता जायन्ते। **अध्ययने** अस्माकं मनांसि न **रमन्ते** । अतः कृपया स्वच्छतायाः समुचित-व्यवस्थायै **कर्मकरान्** प्रेरयन्तु अत्रभवन्तः ।

दिनांकः 28-8-20_ _ भवताम् आज्ञानुवर्ती

समस्तः **छात्रवृन्दः**

9. सेवायाम्

श्रीमन्तः प्रधानाध्यापक, महोदयाः,

राजकीयः उच्चप्राथमिक **विद्यालयः**,

बीकानेरम् ।

**विषयः**-शैक्षिक-**शिविरस्य** आयोजनार्थं प्रार्थना-पत्रम्।

महोदयाः,

सविनयं **निवेद्यते** यद् अस्मद्विद्यालये **शिक्षण-व्यवस्था** पूर्णसन्तोषकरी वर्तते । तथापि **अस्माकं ज्ञान-पिपासा** तृप्तिं न एति । अतः प्रार्थयामो **वयं** यद् अस्मत्-कृते 15 दिनात्मकम् एकं शैक्षिक-शिविरम् **आयोज्य** अनुग्रहणन्तु श्रीमन्तः ।

दिनांकः 18-11-20_ _ भवदाज्ञाकारिणः **शिष्याः**

अष्टम् कक्षास्थाः छात्राः

**10.** दिनाङ्कः 12-12-20_ _

प्रेषकः,

**प्रधानाध्यापकः**

राजकीय-उच्च-प्राथमिक विद्यालयः

सीकरम् ।

**प्राप्तकर्ता:**

प्राचार्याः

गायत्री-कन्या-महाविद्यालयः

सीकरम् ।

महोदयाः,

प्रसन्नतायाः प्रसङ्गोऽयं यत्प्रतिवर्षमिव अस्मिन् **वर्षेऽपि** अस्माकं **विद्यालयस्य** वार्षिकोत्सवः 19-12-20_ _ दिनाङ्के **बुधवासरे** मध्याह्ने एकवादने **विद्यालयस्य** सभाभवने सम्पत्स्यते । अस्य मुख्यातिथ्यः क्षेत्रीयाः **विधायक** महोदयाः भविष्यन्ति ।

अस्मिन् उत्सवे **भवताम्** उपस्थितिः सादरं प्रार्थ्यते ।

**भवदीयः**

(विजयानन्दः)

प्रधानाध्यापक

**13.** दौसातः

दिनांकः 16-9-20_ _

प्रिय अशोक !

**चिरंजीव ।**

अत्र कुशलं तत्रास्तु ।

आवयोर्माता **स्वपत्रेण** सूचयति यत् तव मनः **अध्ययने** पूर्ववत् न रमते । प्रायेण **क्रीडने** एव संलग्नः तिष्ठसि त्वम् । इदं तु महत् **अशोभनम्** अस्ति । अयं ते **जीवनस्य** निर्माणकालः, अतः कथञ्चिदपि **आत्मनो** लक्ष्यात् न विरन्तव्यम् । अध्ययनमेव तव **जीवनम्** उन्नेष्यति ।

चि. अशोकः उपाध्यायः **शुभेच्छुः**

**किशनगढ़ः** (अजमेर) पद्माकरः उपाध्यायः

**14.** प्रिय अनुज ! व्याबर (अजयमेरु)

चिरंजीव । दिनांकः 3-10-20_ _

अत्र **कुशलं** तत्रास्तु ।

तव एकेन मित्रेण **सूचितं** यत् स्वशिक्षकैः सह तव **व्यवहारः** शिष्टः न अस्ति । **सहपाठिषु** अपि त्वम् असाधुः संवृत्तः **असि** । इदं **नोचितम्।** सदाचारस्तु **जीवनस्य** मूलमन्त्रोऽस्ति । कथितं च **'आचारः'** परमो धर्मः इति । आशासे यत् त्वं मम **परामर्शम्** अनुसरिष्यसि।

चि. सुरेन्द्रनाथः, कक्षा 8 (स) **तवाग्रजः**

राजकीय सी. सै. स्कूल, बाड़मेर । राजेन्द्रनाथः

**15.** प्रिय

सुहृन्महेन्द्रनाथ! माउण्ट आबू।

सप्रेम हरिस्मरणम्। दिनाङ्कः 14-12-20_ _

अत्र **कुशलं** तत्रास्तु।

तव स्नेह-पत्रं मया **अद्यैव** अधिगतम्। तव उत्साहवर्धकैः **वचनैः** अहम् अनुगृहीतोऽस्मि। त्वादृशानां **मित्राणां** प्रेरणैव मम **साफलतायाः** कारणम्। अहं **स्वाध्याये** एकचित्ततया संलग्नोऽहं **पुनरपि** श्रेष्ठां **सफलतां** प्रति आश्वस्तोऽस्मि। तव प्रगतिम् **अनामयं** च कामयन्।

प्रतिष्ठायाम्, तव मित्रम्

श्री महेन्द्रनाथः जगन्नाथः

**16.** प्रिय मित्र श्याम ।

**नमस्कारः** ।

अत्र कुशलं तत्रास्तु ।

मम वार्षिकी परीक्षा **मार्चमासस्य** पंचविंशतितमे दिनांके **समाप्तिम्** गता । परीक्षानन्तरम् **अहं** शीघ्रमेव गृहं प्रति प्रस्थास्यामि **ग्रीष्मावकाशे** च गृहे एव स्थास्यामि । त्वं गृहं **कदा** आगमिष्यसि ? शीघ्रं सूचय । अहम् **त्वाम्** औत्सुक्येन **प्रतीक्षिष्ये**।

दिनांकः 27-7-20_ _ **भवदीयः**

राजेशः

रा. उ. प्रा. विद्यालयः शाहपुरा (भीलवाड़ा)

**17.** 56, आर्यनगर, बून्दीतः

पूज्येषु मातृचरणेषु, दिनांक : 9-9-20_ _

सादरं वन्दे।

भवदीयं **कृपापत्रं** मया अद्य लब्धम्। **अहम्** अत्र **सर्वथा** प्रसन्नोऽस्मि। पूज्येन पित्रा **प्रेषितेन** धनेन मम निर्वाहः **सुखेन** सम्पद्यते। किन्तु पाठ्य-विषयाणाम् **विशिष्ट** अध्ययनाय केषाञ्चित् अतिरिक्त **पुस्तकानां**

क्रयणम् आवश्यकम् अस्ति। एतदर्थं चाहं **पञ्चाशत्** रूप्यकाणि अपेक्षे। एतद्धनम् अविलम्बं धनादेश-माध्यमेन **प्रेषयतु,** इति पित्रे निवेदनीयम्। **पितृचरणाभ्यां** मे प्रणामाञ्जलिः स्वीकार्या। अनुजादिकाश्च मे चिरंजीवन्तु इति अभिलषन्।

**प्रतिष्ठायाम्,**

श्रीमत्य आरती भवत्याः स्नेहभाजनम्
निहालगंज धौलपुरम्। राकेशः

**18.** सेवायाम्,
श्रीमत्यः प्रधानाध्यापिका महोदयाः,
**राजकीयः बालिका** माध्यमिकविद्यालयः,
भरतपुरः ।
महोदयाः,
सविनयं **निवेदनमस्ति** यत् मम ज्येष्ठभगिन्याः **पाणिग्रहणसंस्कारः** दिनद्वयं पश्चात् **भविष्यति** । एतत्कारणात् दिनद्वयं **यावद्** अहं स्वकक्षायामुपस्थातुं न **शक्नोमि** ।
अतः निवेदनमस्ति यत् दिनांकः 1-8-20_ _ तः 2-8-20_ _ पर्यन्तं **दिनद्वयस्य** अवकाशं **स्वीकृत्य** माम् अनुग्रहीष्यन्ति श्रीमत्यः।
दिनांकः 29-7-20_ _ भवदाज्ञाकारिणी शिष्या,
अभिलाषा शर्मा
कक्षा अष्टम (अ)

**19.** रतनगढ़तः
दिनांकः 27-3-20_ _

**सेवायाम्,**
सम्मान्य बन्धुवर्य ।
सादर वन्दे !
प्राप्तं भवतः **कृपापत्रम्** अद्यैव । ह्यः **परिषदा** अस्माकं परीक्षा-फलं **घोषितम्** । भवतः आशीर्वादात् इयं **परीक्षा** मया प्रथमश्रेण्याम् उत्तीर्णा। अकं-पत्रे प्राप्ते सति सविस्तारं **लेखिष्यामि** ।

**भवतः अनुजः**
रामेश्वरदासः

**20.** सेवायाम्,
श्रीमन्तः प्रधानाध्यापकाः महोदयाः,
**राजकीयः** माध्यमिक विद्यालयः, सेवरम् ।
महोदयाः,
सविनयं **निवेदनमस्ति** अस्ति यत् अहम् **अस्मिन्** विद्यालये अष्टम् कक्षायाम् **अध्ययन** रतः अस्मि। ई-मित्राद् **आधारपत्रं** निर्माणयितुम् **इच्छामि**। तस्य कृते अस्य **विद्यालयस्य** 'अध्ययन-प्रमाण-पत्रम्' **अपेक्षितम् । अध्ययन-प्रमाण-पत्रेण** विना सः आधार-पत्रं न प्रदास्यति। अतः मह्यम् अध्ययन-प्रमाण पत्रम् अवदाय अनुग्रहण्तु श्रीमन्तः।
दिनांकः 20-3-20_ _ भवदाज्ञाकारिणी शिष्य,
सोमदत्त
अष्टम् कक्षायाः छात्रः

●●

## पाठ-2 चित्रवर्णनम्

**1.** 1. इदम् मम गृहम् अस्ति।
2. गृहं सर्वतः सुन्दरवृक्षाः सन्ति।
3. वृक्षेषु बहूनि पुष्पाणि भवन्ति।
4. मम गृहे मन्दिरम् अस्ति।
5. वयं प्रातःकाले तत्र पूजां कुर्मः।

**2.** 1. वृक्षाः अस्माकं मित्राणि सन्ति।
2. वृक्षैः पर्यावरणं शुद्धं भवति।
3. वृक्षैः भूमेः रक्षणं भवति।
4. वृक्षारोपणम् अस्माकं कर्त्तव्यम्।
5. प्रतिवर्षं वर्षाकाले जनाः वृक्षारोपणं कुर्वन्ति।

**3.** 1. इदं नद्याः चित्रम् अस्ति।
2. नदीम् उभयतः वृक्षा सन्ति।
3. वृक्षेषु पादपेषु च खगाः कूजन्ति तिष्ठत्ति च।
4. खगाः मधुरं गायन्ति।
5. नदी-जलं कल-कल स्वरेण प्रवहति।

**4.** 1. अस्मिन् चित्रे ग्रामस्य एक तडागः अस्ति।
2. तडागस्य तटे एकः विशाल वृक्षः तिष्ठति।
3. तथा अनेके बालकाः क्रीडन्ति।
4. तडागस्य जले बालकाः, युवकाः वृद्धाः, च स्नानं कुर्वन्ति।

5. पशवः अपि जलं पिवन्ति, खगाः च कूजन्ति।

5. 1. एतस्मिन् चित्रे एकः जलाशयः रमणीयः पर्वतः च स्तः ।

2. जलाशये वर्तिकाः तरन्ति।

3. जलाशयस्य तटे बहवः वृक्षाः सन्ति ।

4. अत्र शीतलवायुः प्रवहति।

5. जलाशयस्य दृश्यं मनोरमम् अस्ति।

## पाठ–3 कथा लेखनम्

### पाठगत कथा लेखन

1. कस्यचिद् मनुष्यस्य गृहे एक गर्दभः आसीत्। सः तस्य पृष्ठे लवणस्य भारं धृत्वा नयति स्म। सः सदैव नद्याः पारं नयति। एकदा यदा सरितः जलमध्ये चलति स्म तदा तस्य पादमस्खलत्। सः जलेऽपतत्। लवणः जले विलीयते स्म। गर्दभः तथ्यमिदम् अजानत्। यत् यथा यथा लवणः जले विलीयते तथा तथा एव भारमपि अल्पताम् आप्नोति। एतद् ज्ञात्वा गर्दभः नित्यमेव सरितः जले पतति भारं च अल्पतरम् करोति। एकदा सः मनुष्यः तस्य पृष्ठे तूलं (कार्पासं) अनयत्। गर्दभः नित्यमिव जलेऽपतत्। जल संग्रहणात्तूलस्य भारमतितरमभवत् भारस्याधिक्यात् गर्दभः उत्थातुमति असमर्थोऽभवत्। यत्नेन उत्थाय अपि चलितुमसमर्थः अजायत्। असमर्थोऽसौ भारेण पीड़ितः स्वामिना प्रताडितः ताडितः। वराकः गर्दभः धूर्ततामत्यजत्।

2. केनचिद् मनुष्येण एकः गज पालितः आसीत्। सः जलं पातुं स्नातुं च नित्यमेव नद्यास्तटं गच्छति स्म। तत्र आपणिकाः मार्गे तस्मै किमपि खादितुं यच्छति स्म। मार्गे एकस्य सौचिकस्य अपि आपणमासीत्। सः वस्त्राणि सीव्यति स्म। आपणेऽनेकानि स्यूतानि वस्त्राणि अवलम्बितानि आसन्। एकदा असौ सौचिकः परिहासे गजस्य करे सूचिम् अभिनत्। क्रुद्धः सन् गजः नद्याः तटमगच्छत्। तत्र स्नात्वा जलं च पीत्वा स्वकीय करे (शुण्डे) पङ्किलं जलमानयत्। सौचिकस्यापणमागत्य नव स्यूतेषु महार्घेषु वस्त्रेषु असिंचत् सौचिकः किमपि न कर्तुमशक्नोत्। पश्चात्ताप-निमग्नोऽसौ गजं क्षमामयाचत्। लज्जाम् अनुभवति।

3. एकः वृद्धः व्याघ्रः नद्याः तटे वसति स्म। एकदा व्याघ्रः स्नातः कुशहस्तः ब्रूते-'भोः भोः पान्थाः। इदं सुवर्ण कङ्कणं गृह्यताम्।' एकः पान्थः आगच्छति स्म। तमवलोक्य व्याघ्रः पुनः तथैव अकथयत्। व्याघ्रं निवेदनं श्रुत्वा लोभाकृष्टः पान्थः व्याघ्र-मुपासरत्। सः चिन्तयति—न सन्दिग्धे प्रवृत्ति-र्विधेया। तथाप्यसौ तत्र प्राप्यापृच्छ—'कुत्र ते कङ्कणम्।' व्याघ्रः हस्तं प्रसार्य दर्शयति। पान्थे- नोक्तम्—कथं त्वयि हिंसके विश्वासः। व्याघ्र उवाच—इदानीं तु अहं धार्मिकानामुपदेशेन हिंसां परित्यज्य स्नानशीलो दाता च भूत्वा विश्वासभूमिः। इति विश्वासम् उत्पादयति। लोभरहितोऽहं सुवर्णकङ्कणं यस्मै यस्मै कस्मैचित् दातुमिच्छामि। व्याघ्रो मानुषं खादति। इति अपवादस्तु दुर्निवारः। अतः त्वसरति स्नात्वा गृहाण इदं कङ्कणम्। पान्थः अग्रे स्नातुं प्रविष्टः तावत् महापंके निमज्जतिः पलायितमक्षमोऽजायत्। वृद्ध व्याघ्रः विहसन्नेव शनैः शनैः उपगम्य पान्थं धृतवान्।

4. एकस्मिन् निर्जने वने एकः वटवृक्षः आसीत्। तस्मिन् वृक्षे एकः कोटरः आसीत्। तस्मिन् कोटरे वायस दम्पती सुखेन अवसताम्। वटवृक्षस्य अधस्तात् एव एकस्मिन् बिले एक कृष्णसर्पः तिष्ठति स्म। सः तयोः शावकान् खादति स्म। एकदा काकः श्रृगालेन परामृष्टः महाराज्ञाः रत्नजटितं स्वर्णहारम् अपहृत्य आनयत्। मित्रेण श्रृगालेन परामृष्टोऽसौ स्वर्णहारं सर्पस्य बिले अक्षिपत्। राजपुरुषाः स्वर्णहारम् अन्वेष्टम् इतस्ततः अगच्छन् भ्रमन्तः राजपुरुषाः वृक्षस्य समीपम् आगच्छत्। तैः सर्पस्य बिले हारं दृष्टम्। सर्पमेव चौरं मत्वा बिलं च खनित्वा दण्डप्रहारैः सर्पमघ्नन्। एवं मित्रस्य सत्यपरामर्शेन सदुपायेन च वायस दम्पती स्व शावकान् अरक्षताम्।

5. एकस्मिन् ग्रामे एकः कृषकः प्रतिवसति स्म। सः कुक्कुट-पालनं करोति स्म। तस्य कुक्कुटेषु एका कुक्कुटी नित्यम् एकं स्वर्णाण्डं प्रसूते स्म। कृषकः अति लुब्धः आसीत्। सः एकदा एव सर्वाणि अण्डानि ग्रहीतुमैच्छत्। सः तस्या उदरं व्यादारयत् परञ्च न आसीत्

तत्र एकमपि अण्डम् कुक्कुटी हता। कृषकोऽपि महद् दु:खम् अनुभवन् पश्चातापम् अकरोत्।

6. कस्मिंश्चिद् वन प्रदेशे एक: मृग: वसति स्म। अहंकाराविष्टोऽयं स्वैरं विचरति स्म। एकदा असौ जले स्वकीयं प्रतिबिम्बम् अपश्यत् मनोहराणि श्रृंगाणि अवलोक्य अति प्रसन्नोऽजायत् परञ्च अशोभनान् पादान् अवलोक्य स: अति खिन्नोऽभवत्। एकदा कोऽपि वधिक: तत्र आगच्छत्। तेन सह कुक्कुरा: अपि आसन्। मृगमवलोक्य कुक्करा: तमन्वेधावन्। मृगयु: अपि मृगमन्वसात्। मृग: द्रुततरादिप द्रुतरमधावत् परञ्च तस्य श्रृंगाणि वृक्ष शाखासु गुल्मेषु च संलग्नानि अभवन्। तेन असौ धावनेऽसमर्थ: अभवत्। तम् आक्रम्य कुक्कुरै: हत:।

7. कस्मिंश्चिद् वन-प्रदेशे एक: सिंह प्रतिवसति स्म। एकदा: स: वृक्षस्य छायायां स्वपिति स्म। तस्य वृक्षस्य अधस्तात् एक: मूषक: बिलं कृत्वा वसति। स: मूषक: बिलात् निसृत्य सुप्तस्य सिंहस्य पृष्ठं तस्य केशान् कृन्ततिस्म। जागृत: सिंह: अवदत्- कोऽसि? कथं मे केशान् कृन्तति? अहं त्वां हनिष्यामि।' मूषको निवेदयति—अहं छुद्रमूषक: सन्नपि भवतां साहाय्यं करिष्यामि। दयार्द्र सिंह: तमुपहन्सन्नमुञ्वत्।
एकदा: सिंह: वधिकै: पाशे निबद्ध:। स: उच्चै: अगर्जत्। मूषक: सिंहमापन्नं ज्ञात्वा तत्रैव प्राप्नोत्। स: तस्य जालं छित्वा पाशवद्धं सिंह: मोचयति। मुक्त: सिंह: मूषकेन सह मैत्रं विधाय स्वैरं विचरति स्म।

8. कस्मिंश्चद् वनोद्देशे एक: व्याघ्र: वसति स्म। एकदा असौ बधिकेन पञ्जरे बद्ध:। व्याघ्र: पाशे खिन्न: सन् स्थित:। ततोऽसौ मार्गे विप्रमेकं गच्छन्तम् अपश्यत्। व्याघ्र: ब्राह्मणाय न्यवेदयत्—'मां मोचय।' दयार्द्र: ब्राह्मण: व्याघ्रस्य दयमान: तं मोचयित्वा सहाय्यमकरोत्। परञ्च हिंसक: व्याघ्र: तु कृतघ्न: आसीत्। स: विप्रं खादितुमैच्छत्। विप्र: तं स्वजीवनं याचमान: न्यवेदयत्—'हे मृगराज! मा मां व्यापदय मां मा भक्षय। कृतज्ञोभव। परञ्च निर्दय: व्याघ्र: नाशृणोत्। तदैव तत्र एक: श्रृगाल: आगच्छत्। सोऽवदत्— नाहं मन्ये यत् त्वं विशालकाय: अस्मिन् लघु पञ्जरे बद्ध: आसीत्। अत: पुन: प्रविश्य मां दर्शय व्याघ्र: यावत् पुन: प्रविश्य दर्शयति तावत् श्रृगाल: कपाटं व्युपदघात्। एवं व्याघ्रं पञ्जरे पुन: निक्षिप्य विप्रं रक्षति।

9. एकस्मिन् वने एका लोमशा वसति स्म। एकदा सा भोजनस्य अभावे क्षुधापीड़िता अभवत्। भोजनार्थं सा वने इतस्तत, भ्रमन्ती उद्यानम् आगच्छत्। तत्र सा एकां द्राक्षालताम् अपश्चत्। द्राक्षा लतायां अनेकानि द्राक्षाफलानि आसन्। तानि दृष्ट्वा सा अतिप्रसन्ना अभवत्। सा उत्प्लुत्य नैकवारं द्राक्षाफलानि खादितुम् प्रयत्नम् अकरोत् किन्तु दूरस्थात् सा सफला न अभवत्। निराशां प्राप्य लोमशा प्रत्यागच्छत् अवदत् च-द्राक्षाफलानि अहं न खादामि, तान तु अम्लानि सन्ति।

## अभ्यास:

1. आसीत् एक: वधिक:। स: वनमुपवसति स्म। माँस लुब्धोऽसौ व्याध: धनुरादाय मृगयार्थ मृगमन्विष्यन् काननान्तारमगच्छत्। तत्र तेन कोऽपि मृग: व्यापादित:। मृगमादाय गच्छता तेन घोराकृति: शूकरो दृष्ट:। स: मृगं भूमौ निधाय शरेण शूकरमहनत्। शूकर: गर्जन कुर्वाण पादाघातेन तमाहतवान्। व्याध: हत: छिन्न द्रुम इव पपात। तस्य पादस्खलितेन एक सर्प: अपि मृत:। मृते व्याधे तत्रागत एक: श्रृगाल:। स: तान् मृतानवलोक्य प्रसन्नोऽभवत्। सोऽचिन्तयत्—'अहो! भाग्यम्, अद्य महद् भोजनं मे समुपस्थितम्। अद्य तु धनुलग्नं स्नायुबन्धनमेव खादामि।' एवं कुर्वन्नसौ छिन्ने स्नायुबन्धने द्रुतमत्प्लवितेन कोरण्डेन हृदिभिन्न: श्रृगाल: पञ्चत्वं गत:।

2. एकस्मिन् वने एक: सिंह वसति स्म। स: नित्यम् एव अनेकान् पशून् हत्वा खादति स्म। बहव: तु भयभीता: म्रियन्ते। केचन पलायनं कुर्वन्ति। सर्वे मिलित्वा परामर्श कुर्वन्ति। एकदा एकस्य शशकस्य वार: समायात:। स: शशक: चतुर: आसीत्। स: सिहं प्राप्य तं च विलोक्य विभेति स्म। भयभीत: शशक: उच्चै: विलपति स्म। सिंह: तमपृच्छत्—'त्वं कथं विलपसि' शशक: ब्रूते—'महाराज! वने एक: अन्य सिंहोऽपि अस्ति। स: आत्मानं वनस्य शासकं मनुते। सर्वान् पशून् शासनं पालयितुम् आदिशाति। बहून् च पशून् निहत्य खादति। सिंह क्रुद्ध सन् अवदत्—'कुत्र तिष्ठति स: अन्य: सिंह:। मां दर्शय। अहं तं हत्वा निर्वाधं शासनं करिष्यामि। शशक:

ब्रूते—'स: तु एकस्मिन् दुर्गमदुर्गे निवसति'। एवम् उक्त्वा स: तं सिंहम् एकस्य कूपस्य समीपं नयति स्म। कूपं च दर्शयति स्म। क्रुद्ध: सन् सिंह कूपस्य जले स्वकीयं प्रतिबिम्बम् अपश्यत्। प्रतिबिम्बं दृष्ट्वां अगर्जत्। स: कूपे कूर्दते स्म। तत: निर्गन्तुम् असमर्थ: पञ्चत्वं गत:। एवं शशक: बुद्धि बलेन आत्मरक्षाम् अकरोत्।

3. काशीनगरे एक: पण्डित: अस्ति। 'पण्डितसमीपम् एक: शिष्य: आगच्छति। शिष्य: वदति "आचार्य! अहं विद्याभ्यासार्थम् आगतवान्! पण्डित: शिष्यबुद्धि परीक्षार्थम् पृच्छति-वत्स ! देव: कुत्र अस्ति ?" शिष्य: वदति गुरो! देव: कुत्र नास्ति। कृपया भवान् एवं वदतु। सन्तुष्ट: गुरु वदति देव: सर्वत्र अस्ति। देव: सर्वव्यापी। त्वम् बुद्धिमान् अत: विद्याभ्यासार्थम् अत्रैव वस।

4. एकस्मिन् निर्जने वने एक: वटवृक्ष: आसीत्। तस्मिन् वृक्षे एक: कोटर: आसीत्। तस्मिन् कोटरे वायस दम्पती सुखेन अवसताम्। वटवृक्षस्य अधस्तात् एव एकस्मिन् बिले एक कृष्णसर्प: तिष्ठति स्म। स: तयो: शावकान् खादति स्म। एकदा काक: श्रृगालेन परामृष्ट: महाराज्ञा: रत्नजटितं स्वर्णहारम् अपहृत्य आनयत्। मित्रेण श्रृगालेन परामृष्टोऽसौ स्वर्णहारं सर्पस्य बिले अक्षिपत्। राजपुरुषा: स्वर्णहारम् अन्वेष्टम् इतस्तत: अगच्छन् भ्रमन्त: राजपुरुषा: वृक्षस्य समीपम् आगच्छत्। तै: सर्पस्य बिले हारं दृष्टम्। सर्पमेव चौरं मत्वा बिलं च खनित्वा दण्डप्रहारै: सर्पमघ्नन्। एवं मित्रस्य सत्यपरामर्शेन सदुपायेन च वायस दम्पती स्व शावकान् अरक्षताम्।

●●

# पाठ–4 निबन्ध लेखनम्

## पाठगत निबन्ध लेखन

### 1. परोपकार:

परेषाम् प्राणिनामुपकार: परोपकारोऽस्ति। परस्य हितसम्पादनं मनसा वाचा कर्मणा चान्येषां हितानुष्ठानमेव परोपकारशब्देन गृह्यते। संसारे परोपकार: एव स गुणो विद्यते, येन मनुष्येषु सुखस्य प्रतिष्ठा वर्तते। परोपकारेण हृदयं पवित्रं सरलं सरसं सदयं च भवति। सत्पुरुषा: कदापि न स्वार्थतत्परा: भवन्ति। ते परेषां दु:खं स्वीयं दु:खं मत्वा तन्नाशाय यतन्ते। ते दीनेभ्यो दानं ददति, निर्धनेभ्यो धनम्, वस्त्रहीनेभ्यो वस्त्रम्, पिपासितेभ्यो जलम्, बुभुक्षितेभ्योऽन्नम्, अशिक्षितेभ्यश्च शिक्षां ददति। सज्जना: परोपकारेणैव प्रसन्ना: भवन्ति। परोपकारभावनयैव दधीचि: देवानां हिताय स्वीयानि अस्थीनि ददौ। महाराज: शिवि: कपोतरक्षणार्थं स्वमांसं श्येनाय प्रादात्। अस्माकं शास्त्रेषु परोपकारस्य महत्ता वर्णिता। प्रकृतिरपि परोपकारस्यैव शिक्षां ददाति। अत: सर्वदा सर्वैरपि परोपकार: करणीय:।

### 2. अहिंसा परमोधर्म

निरपराधानां प्राणिनां हिंसनं न कर्त्तव्यम्, इत्यहिंसाया: भाव:। अस्माकं धर्मेऽहिंसाया: स्थानं महत्त्वपूर्णमस्ति। अहिंसाधर्मस्यैव पालनेन भगवत: बुद्धस्य गणना दशावतारेषु क्रियते। भगवान् महावीरोऽपि अहिंसाधर्मस्यैव पालनेन सर्वेषां पूज्यस्थानमासीत। निरपराधस्य कस्यापि जन्तो: हिंसनं नूनं निन्दनीयम्। अहिंसाया: पालनं मनसा, वाचा, कर्मणा च कर्त्तव्यम्। कस्यापि विषये दुर्भाव: कटुवाक्प्रयोगश्च हिंसैव गण्यते। भारतीयसंस्कृतौ केवलं धार्मिकक्षेत्रे अहिंसापालनस्य महिमा गीत: नहि राजनीतिके व्यवहारे। स्मृतिकृता भगवता मनुना स्पष्टमेवोल्लिखितं यत् गुरुं बालं वृद्धं वा आततायिरूपेणायान्तम् अविचारयन्नेव हन्यात्। धर्मशास्त्रेषु ब्राह्मणोऽवध्य: इत्युक्तम्, परं यदि ब्राह्मण आततायी स्यात् तर्हि सोऽपि बध्य: स्मृत:। राजनीतिके व्यवहारे क्षेत्रे च यथास्थिति-हिंसा श्रेयस्करी।

### 3. प्रशस्यमौदार्यम्

संस्कृतकवि: माघ: राजस्थान राज्यस्य भीनमाल नामके नगरेऽजायत। कवि: अति उदारहृदय: आसीत्। वार्धिक्ये स: निर्धनोऽजायत। एकदा कोऽपि याचक: माघस्य गृहमागच्छत्। महाकवि: क्षणं विचार्य निद्रानिमग्नाया: भार्याया: हस्तात् एकं स्वर्णकंकणम् उत्तार्य याचकाय अयच्छत्। यावत् याचक: गन्तुमिच्छति तावत् माघपत्नी अवदत्—भ्रात:! अपरं कंकणम् अपि नय, यत: एकेन

कंकणेन कन्यायाः विवाहं न भविष्यति। सा अपरम् अपि कंकणं याचकाय अयच्छत्। याचकः कविपत्नीं श्रद्धया अवानमत् अवदत् च अहो प्रशस्यं माघस्यौदार्यम्।

### 4. सन्तोषः परमं सुखं

मानवः जीवने सुखं वाञ्छति। सुखं कुत्र अस्ति, कुतः वा प्राप्यते ? केचन मन्यते धनेन सुखं भवति। अद्यत्वे धनमेव सर्वस्वं जातम्। धनविहीनः पशुसमानः इति एव भावना प्रबला जाता परन्तु धनिषु अपि सन्तोषः नास्ति। ते अधिकाधिकं धनम् इच्छन्ति, अधिकाधिकाः च दुःखिनः भवन्ति। सन्तोषस्य कष्टस्य दुःखस्य वा हेतुः मनः। यदि मनः प्रसन्नं भवति तदा सुखं भवति। मनः सन्तोषेण प्रसन्नं भवति अन्यथा लालसा वर्धते सुखं च नश्यति। सन्तोषः प्राप्यते त्यागतः परोपकारतः च। यदा धनं, बुद्धिः अन्यस्य कृते उपयुज्यते तदा आनन्दः भवति। साहाय्यप्रवृत्ति अस्माकं जीवनस्य अंगं भवेत्। अस्माकं व्यवहारः प्रीतिपूर्णः भवेत्। तदा मनः सन्तुष्टं भवति। मनसि च परितुष्टे जीवनं भवति सुखमयम् आनन्दपूर्णं च।

### 5. षडदोषान् वर्जयेत्

षट् कारणानि श्रियं विनाशयन्ति। प्रथमं कारणम् अस्ति असत्यम्। यः नरः असत्यं वदति, तस्य कोऽपि जनः विश्वासं न करोति। निष्ठुरता अस्ति द्वितीयं कारणम्। उक्तं च–'सत्यं ब्रूयात, प्रियं ब्रूयात्, न ब्रूयात् सत्यमप्रियम्।' तृतीयं कारणम् अस्ति कृतघ्नता। जीवने अनेके जनाः अस्मान् उपकुर्वन्ति। प्रायः जनाः उपकारिणं विस्मरन्ति, प्रत्युपकारं न कुर्वन्ति। एतादृशः स्वभावः कृतघ्नता इति उच्यते। आलस्यम् अपरः महान दोषः 'आलस्यं हि मनुष्याणां शरीरस्थ महारिपुः। अहंकारः मनुष्यस्य मतिं नाशयति। अहंकारी मनुष्यः सर्वदा आत्मप्रशंसाम् एव करोति। न कदापि कस्यचित् उपकारं करोति। व्यसनानि अपि श्रियं हरन्ति। ये मद्यपानं कुर्वन्ति तेषाम् आत्मबलं, बुद्धिबलं, शारीरिकबलं च नश्यति। अतः बुद्धिमान् एतान् दोषान् सर्वथा त्यजेत्।'

### 6. दीपावली

दीपावली अस्माकं राष्ट्रियोत्सवः वर्तते। अस्मिन् उत्सवे सर्वे जनाः आनन्दमग्नाः भवन्ति। त्रेतायुग कैकेय्याः वरयाचनात अयोध्यायाः राज्ञा दशरथेन रामाय चतुर्दशानां वर्षाणां वनवासः प्रदत्तः। श्रीराम अस्मिन् एव दिने सीतालक्ष्मणाभ्यां सह अयोध्यां प्रत्यावर्तितवान्। तेषां स्वागतं व्याहर्तुम् अयोध्यावासिनः नगरे सर्वत्र दीपान् प्रज्वालितवन्तः तदा आरभ्य अद्यावधिः प्रतिवर्षं कार्तिकमासे अमावस्यायां तिथौ भारते दीपावली–महोत्सवः महता उत्साहेन आयोजितः भवति। दीपावल्यां जनाः गृहाणि परिष्कुर्वन्ति। अस्मिन्नवसरे ते स्वमित्रेभ्यः बन्धुभ्यश्च उपहारान् यच्छन्ति, परस्परम् अभिनन्दन्ति च। बालकेभ्यः मिष्ठान्नं यच्छन्ति। सर्वे जनाः लक्ष्मी–गणेशयोः पूजनं कुर्वन्ति। पितरः स्वसन्ततिभ्यः स्फोटनकानि ददति। अस्मिन् महोत्सवे सर्वे सर्वेभ्यः सुखाय समृद्धये च शुभकामनां प्रकटयन्ति।

### 7. वृक्षाणां महत्वम्

वृक्षाः भूमे उद्भवन्ति। वृक्षाः अपि मनुष्य इव भुक्त्वा पीत्वा च जीवन्ति। मूलानि वृक्षाणां मुखानि भवन्ति। ते पादैः जलं पिबन्ति अतएव 'पादपाः' कथ्यन्ते। तेषां मूलानि भूमितः रसं गृहीत्वा सर्वेषु अवयवेषु नयन्ति, तेन ते प्रवर्धन्ते, पुष्पन्ति, फलन्ति। वृक्षाः अपि वर्षाशीतातपैः प्रभाविता भवन्ति। तेऽपि सुखानि दुःखानि च अनुभवन्ति। ते अपि प्राणवन्तः भवन्ति, अतएव ते प्राणिनः इव जायन्ते, वर्धन्ते, पुष्पन्ति, फलन्ति, म्रियन्ते च। ते कदापि खगमृगजलचरनराः इव न विचरन्ति अतः अचराः कथ्यन्ते। बहूपकारं कुर्वन्ति वृक्षाः प्राणिनाम्। ते अशरणानां शरणम्–बुभुक्षितानां भोजनम्, संतप्तानां समाश्रयाः, श्रान्तानां विश्रामगृहाणि, सुखिनं सौख्योपकरणानि, अच्छत्रिणां छत्रम्, निरालम्बिनां आलम्बनम्, प्राणवायुभिः प्राणदातारः, वृष्टिकारकाः, मृद्रक्षकाः सुहृदश्च जगतः। वृक्षारोपणं वृक्षरक्षणं च अस्माकं रक्षायै परमावश्यकम्।

### 8. होलिकोत्सव

अस्माकं देशे अनेकेः उत्सवाः आयोजिताः भवन्ति। होलिकोत्सवः तेषु प्रमुखः अस्ति। भारतीय–संस्कृतौ होलिकोत्सवस्य विशिष्टं महत्वं वर्तते। हिरण्यकशिपोः भगिन्याः होलिकायाः दहनेन अयम् उत्सवः सम्बद्धः अस्ति। सा देवस्य वरप्रभावेण अग्निना दग्धा न भवति

स्म। अतएव हिरण्यकशिपोः निर्देशेन सा प्रह्लादम् अङ्के उपवेश्य अग्नौ उपविष्टवती। परन्तु प्रह्लादस्य भक्त्या प्रसन्नो भूत्वा नारायणः प्रह्लादं रक्षितवान्। प्रज्वलितेन अग्निना सा स्वयमेव दग्धा। तस्याः घटनायाः स्मृतिरूपेण प्रतिवर्षं फाल्गुन-पूर्णिमावसरे होलिकोत्सवः भवति। होलिकोत्सवस्य नाम श्रुत्वा भारतीयानां चेतांसि प्रफुल्लितानि भवन्ति। अस्मिन् अवसरे जनाः परस्परं प्रेम्णा मिलन्ति। एतेन तेषां प्रीतिः वर्धते।

### 9. विद्यालयस्य वार्षिकोत्सव

अस्माकं विद्यालयः राजकीयः विद्यालयः अस्ति। अत्र पठनस्य तु श्रेष्ठां व्यवस्था अस्ति एव, युगपदेव क्रीडानामपि सुलभा व्यवस्था अस्ति। अतएव अस्माकं विद्यालयस्य सर्वाषां कक्षाणां परिणामः शतप्रतिशतं भवति। क्रीडानां प्रतियोगितासु अपि अस्माकं विद्यालयस्य छात्राः बहून पुरस्कारान् अलभन्त। अस्माकं विद्यालयस्य वार्षिकोत्सवः परह्यः सम्पन्नो जातः। अस्माकं प्रदेशस्य राज्यपालः मुख्यातिथिः आसीत्। यदैव मुख्यातिथिः द्वारं सम्प्राप्तः छात्राः वाद्ययन्त्राणां ध्वनिना तस्य स्वागतमाचरन्। ततः सः मञ्चस्य सम्मुखे आसन् भूषितवान्।

### 10. धनस्य महत्त्वम्

जीवने धनस्य अत्यधिकं महत्वम् अस्ति। धनेन जीवन-निर्वाह भवति। धनं विना वयं कथं भोजनम् अपि प्राप्तुं शक्नुमः? परन्तु यदि लोभेन वयं अन्धः भूत्वा अधिकाधिकं धनं प्राप्तुम् इच्छामः। अनुचित-साधनानां प्रयोगं कुर्मः, तर्हि तेन धनेन दुःखमेव भविष्यति। तस्य रक्षणे एव समयः व्यतीतः भवति। कोऽपि तद् हरिष्यति इति चिन्ताप्रतिक्षणं वर्धते। अभिमानः विवेकं नाशयति। कृष्णधनस्य प्रच्छादनाय महान् क्लेशः भवति। अतः वयम् उचित साधनैः एव धनार्जनं कुर्यामः, कस्मै अपि ईर्ष्या न कुर्यामः अपितु यथाशक्ति ये असहायाः सन्ति तेषां साहाय्यं कुर्यामः। त्यागेन एव धनस्य संरक्षणं भवति। त्यागेन एव उपभोगेन च वयम् आनन्दं प्राप्तं शक्नुम्। अन्यस्य धनं प्रति कदापि अस्माभिः लोभः नैव कर्त्तव्यः।

### 11. चलभाषित यंत्र

वैज्ञानिकाः सञ्चारसाधनेषु प्रतिदिनं नवीनतमान् आविष्कारान् कुर्वन्ति येन सन्देश प्रेषणे अधिकतमा सुविधा स्यात्। चलभाषित यन्त्रम् (मोबाइल सैलफोन) तादृशमेव लोकप्रियं यन्त्रम्। बालोः वृद्धाः युवकाः, पुरुषाः, महिलाः नागरिकाः, ग्रामीणाः कर्मकराः च सर्वेषाम् एव एतत् कर्णभूषणं जातम्। यानानि आरूढ़ाः, कार्यालयेषु कार्यं कुर्वन्तः, मार्गेषु चलन्तः, सभागारेषु प्रवचनं श्रृण्वन्तः जनाः अस्य ध्वनिं श्रुत्वा वार्तामग्नाः भवन्ति। अविवेकपूर्ण अस्य प्रयोगः कार्येषु व्यवधानं करोति। मार्गेषु दुर्घटनाः भवन्ति। सभागारेषु कक्षासु अन्य स्थानेषु च अव्यवस्था भवति। सत्यमस्ति यत् आविष्कारः कदापि हानिकरः न, परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति। वस्तुतः वयं यन्त्रस्य अधीनाः न स्याम अपितु यन्त्रम् अस्माकम् अधीनं स्यात्। ते एव बुद्धिमन्तः ये विज्ञानस्य सदुपयोगं कुर्वन्ति।

### 12. संहतिः एव कार्यसाधिका

एकदा शरीरस्य सर्वाणि इन्द्रियाणि-हस्तौ, पादौ, मुखं, नासिका, कर्णौ इत्यादीनि मिलित्वा अचिन्तयन्। "वयं सर्वे प्रतिदिनं परिश्रमं कुर्मः। एतद् उदरं सर्व स्वीकरोति, स्वयं किमपि कार्यं न करोति। अद्य प्रभृति वयम् अपि कार्यं न करिष्यामः।" एवं चिन्तयित्वा सर्वाणि अङ्गानि कार्यम् अत्यजन्। पादौस्थिरौ भूत्वा अतिष्ठताम्। हस्तौ निश्चलौ अभवताम्। मुखम् अन्नकणः अपि न प्राविशत्। एवं द्वे दिने व्यतीते जाते। शनैः शनैः सर्वाणि अङ्गानि शिथिलानि अभवन्। कार्यशक्तिः क्षीणा अभवत्। कथमपि पुनः मिलित्वा विचारम् अकुर्वन्—"अहो ! अस्माकं प्रमादः भुक्तस्य अन्नस्य पाचनं तु उदरमेव करोति। एतद् एव अस्मभ्यं शक्तिं ददाति। अस्य कृपया एव वयं जीवामः। अतः अस्माभिः सर्वैः अनेन सह सहयोगः करणीयः।" नूनं संहतिः एव कार्यसाधिका।

## अभ्यासः

### 1. उद्यम

संसारे सर्वे जनाः सुखम् इच्छन्ति। कोऽपि दुःखं न इच्छति। उद्यमं विना सुखं न भवति। उद्यमेन एव मनुष्यः धनी भवति। ये उद्यमं न कुर्वन्ति, ते सुखिनः

न भवन्ति । उद्यमेन एव सर्वाणि कार्याणि सिध्यन्ति । उद्यमेन एव विद्याहीनः विद्वान् भवति। उद्यमेन च बलहीनः बलवान् भवति। उद्यमहीनः पुरुषः किमपि न प्राप्नोति । अतः अस्माभिः सदैव उद्यमः करणीयः।

**2. विजयादशमी**

विजयादशमी प्रमुखतः क्षत्रियाणाम् उत्सवः अस्ति। अयं 'दशहरा' इत्यपि कथ्यते। अयं क्षत्रियाणां कृते उत्साहवर्धकः उत्सवः अस्ति। एषः आश्विनमासस्य शुक्लपक्षस्य दशम्यां तिथौ मन्यते। अयम् उत्सवः मर्यादापुरुषोत्तमस्य रामचन्द्रस्य विजयोल्लासे मन्यते। अस्मिन् एव दिने रामः सीतापहारिणं रावणम् अवधीत्। क्षत्रियाः अस्मिन् दिने स्वशस्त्राणि पूजयन्ति। अयम् उत्सवः अधर्मे धर्मविजयस्य सूचकः अस्ति। विजयादशमी शक्तिपूजायाः उत्सवः वर्तते। बंगालप्रान्ते एतस्मिन् अवसरे दुर्गापूजा भवति।

**3. रक्षाबन्धनम्**

रक्षाबन्धनं हिन्दूनां प्रधानमहोत्सवः अस्ति। अयं ब्राह्मणानां प्रमुखः उत्सवः अस्ति। एषः महोत्सवः श्रावणमासस्य पूर्णिमायां मन्यते। अस्मिन् दिने हिन्दुजनाः रक्षासूत्रं बध्नन्ति। वस्तुतः रक्षाबन्धनं रक्षायाः एव प्रतीकम् अस्ति। भगिन्यः भ्रातृगृहं गत्वा तेषाम् दक्षिणे हस्ते रक्षासूत्रं बध्नन्ति। भ्रातरः भगिनीभ्यः यथाशक्तिः दक्षिणां यच्छन्ति। अयम् उत्सवः भ्रातृभगिन्योः एव अस्ति। एतत् रक्षासूत्रं परस्परप्रेम्णः एकतायाः च सूचकम् अस्ति। वयं रक्षासूत्रस्य महत्त्वं ज्ञात्वा एकतायाः सूत्रे बद्धाः भवेम।

**4. संस्कृतभाषायाः महत्त्वम्**

संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति। प्राचीनकाले इयं जनसाधारणस्य भाषा आसीत्। तदा सर्वे जनाः संस्कृतम् एव वदन्ति स्म। संस्कृतभाषा सर्वाः भाषाः शब्ददानेन पोषयति। अतः संस्कृतभाषा सर्वासां भाषाणां जननी अस्ति। भारतीया संस्कृतिः अस्याम् एव भाषायां सुरक्षिता अस्ति। ये एतां 'मृतभाषा' इति कथयन्ति, ते एव मृताः सन्ति। ते अस्याः भाषायाः महत्त्वं न जानन्ति। अस्माकं वेदाः, पुराणानि, महाकाव्यानि अस्यां भाषायाम् एव सन्ति। अतः अस्माभिः अस्याः प्रचारः प्रसारः च कर्त्तव्यः।

**5. अस्माकं देशः**

भारतः अस्माकं देशः अस्ति। अस्य संस्कृतिः धर्मपरम्परा च श्रेष्ठा अस्ति। अयं देशः सर्वासां विद्यानां केन्द्रम् अस्ति। अयं देशः प्रकृतेः क्रीडास्थली अस्ति। अनेकाः पवित्रतमाः नद्यः अत्र वहन्ति। अस्य उत्तरस्यां दिशि हिमालयः रक्षकः इव स्थितः। अत्र सर्वधर्माणां समानः सम्मानः अस्ति। अस्य भूमिः विविधरत्नानां जननी अस्ति। अत्र विविधाः जातयः निवसन्ति। अस्माभिः सदा अस्य रक्षा करणीया।

**6. हिमालयः**

भारतस्य उत्तरस्यां दिशि हिमालयः स्थितः अस्ति। अयं 'पर्वतराजः' 'नगाधिराजः' वा अपि कथ्यते। अयं सर्वेषु पर्वतेषु उच्चतमः अस्ति। अस्य अत्युच्चानि शिखराणि अतीव शोभन्ते। अत्र विविधाः ओषधयः उत्पन्नाः भवन्ति। देवाः अपि अत्रैव निवासं कुर्वन्ति। गंगादयः पवित्रतमाः नद्यः हिमालयात् एव निर्गच्छन्ति। अयं पर्वतः प्रकृतेः क्रीडाभूमिः अस्ति। अयं पर्वतः भारतदेशं शत्रुभ्यः सर्वदा रक्षति। अयं पर्वतः सर्वथा सर्वेषां हितकरः अस्ति।

**7. मम प्रिय पुस्तकम्**

पुस्तकानि ज्ञानस्य निधयः भवन्ति । ज्ञानप्रदानेन सहैव एतानि अस्माकं मनोरंजनमपि कुर्वन्ति। प्रेरणादायक-पुस्तकानि मह्यम् अतीव रोचन्ते । ईदृशमेव एकं पुस्तकं श्रीमद्भगवद्गीता अस्ति । अस्मिन् पुस्तके मानवमात्राय कल्याणसन्देशः निहितः। इदम् अस्मान् श्रेष्ठसफलजीवनस्य मार्गं दर्शयति । अत्र निहितः कर्मयोगः मानवान् उद्योगिनः करोति । अस्य अध्ययनं जनेषु कर्म प्रति रुचिं जनयति । स्वार्थहीनकर्मकरणेन मनुष्याः श्रेष्ठसन्तुष्टजीवनं यापयन्ति। एवम् इदं पुस्तकं सम्पूर्णं जीवनदर्शनम् अस्ति ।

**8. विद्यायाः महत्वम्**

विद्या प्रधानं धनम् अस्ति। पुण्यं, पापम् इति ज्ञानं विद्यया एव भवति। स्वकर्तव्यज्ञानम् अपि विद्यया एव भवति। विद्या मनुष्याय विनयं ददाति। विनयात् मानवः पात्रतां याति। पात्रत्वात् च मनुष्यः धनं प्राप्नोति। विद्या मनुष्यस्य सुन्दरं रूपम् अस्ति। विद्यारहितः पुरुषः

साक्षात् पशु: एव भवति। विद्या दानेन वर्धते संचयेन च नश्यति। अत: विद्या अपूर्वं श्रेष्ठं च धनम् अस्ति।

**9. अस्माकं विद्यालय:**

अस्माकं विद्यालय: नगरात् बहि: रम्यप्रदेशे अस्ति। अस्य नाम राजकीय: आदर्श: माध्यमिक: विद्यालय: अस्ति। अस्माकं विद्यालये पञ्चदश: अध्यापका: पञ्चशत छात्रा: च सन्ति। सर्वे अध्यापका: विविध विषयेषु निपुणा: सन्ति। अध्ययने तत्परा: छात्रा: क्रीडायाम् अपि कुशला: सन्ति। कन्दुकक्रीडायाम् अस्माकं विद्यालय: प्रथम अस्ति। विद्यालयं परित: एकं रमणीयकम् उद्यानम् अस्ति। अस्माकं विद्यालये एक: विशाल: पुस्तकालय: अपि अस्ति। पुस्तकालये दशसहस्रपुस्तकानि सन्ति। अयं विद्यालय: साक्षात् विद्याया: मन्दिरम् एव अस्ति।

●●

## पाठ–5 सड़क सुरक्षा

**1.** राजमार्ग–सुरक्षार्थम् अस्माभि: सडक–सुरक्षा– नियमानां ज्ञानं प्राप्तव्यम्। राजमार्गम् उभयत: स्थापितानां यातायात–सङ्केतानाम् अभिज्ञानमपि करणीयम्। अल्पायुसि एव वाहन न चालयेत्। वाहन–सञ्चालन काले उच्च–स्वरेण सङ्गीत वर्जयेत्। मार्गे ध्यानं सर्वत: आकृष्य मार्गागतानि वस्तूनि एव न पश्येत्। नैतस्मिन् काले धूम्रपानं कुर्यान्न च चलदूरभाषे केनापि सह वार्तालापं कुर्यात्। सहयात्रिभि: सार्धमपि न संवदेत्।

**2.** सामान्यत: जना: यातायात–नियमेभ्य: अनभिज्ञा: भवानि। विज्ञा: अपि यातायात सङ्केतान् न पश्यन्ति। बहव: तु उपेक्षन्ते। जना: भूमिगतपदाति मार्गस्योपयोगमपि न कुर्वन्ति। निषेधेऽपि निषेध मार्गं प्रविशन्ति। वाहन चालक: समीपस्थै: जनै: सह, चल दूरभाषे च दत्तचित्ता: सन्त: वार्तालापं कुर्वन्ति। केचन तु उपहास–निमग्ना: परिवर्त्य पृष्ठ भागे पश्यन्ति सहयात्रिण:।

**3.** गृहे परिजनै: विद्यालये च शिक्षकै: छात्रा: एतद्विषये प्रशिक्षणीया। प्रार्थना–सभायां समये–समये सडक सुरक्षा नियमानां ज्ञानं प्रदेयम्। भूगोलविषयाध्ययन काले विषयाध्यापकेन यथावसरं यातायात–सङ्केतानां मानचित्राध्ययनस्य परिचय: प्रदेय:। विद्यालये एतद्विषयक प्रश्न–पृच्छा–स्पर्धा अपि आयोज्या। वृत्तपत्रेषु सडक दुर्घटनाया: समाचारं श्रावयित्वा तं प्रति सावहितं कुर्यात् तेभ्य: च मार्ग–सञ्चरण नियम–ज्ञानपि पुन:–पुन: प्रदेयम्। एकस्मिन् सत्रे वारद्वयं सडक–सुरक्षा–नियमान् आधृत्य संवाद, वाद–विवाद, भाषणादीनां स्पर्धानामप्यायोजनं कुर्यात् विजेतारश्च पुरस्करणीया:।

**4.** सुसञ्चालनं विधाय वाहन चालक: दुर्घटनां परिहर्तुं शक्नोति। अत: सुसञ्चालक: जनसम्मर्दाकीर्णमार्गे वाहनं कदापि तीव्र गत्या न चालयेत। वाहनस्यगति: निर्धारिता निर्दिष्टा नियन्त्रिता च भवेत्। अपर्याप्तमपि मार्गं प्राप्य अग्रगमनस्य प्रयत्नं न कुर्यात्। द्रुत गमनमपि सदैव वर्जनीयम्। आगते गत्यावरोधके वाहनस्य गतिरपि अवरोधनीया। निर्दिष्टं मार्गमेवानुसरेत्।

**5.** (i) सङ्केतोऽयं सन्दशकावर्त (U-TURN) इति कथ्यते यन्निर्दिशति यदत्र व्यावर्तन निषिद्धम्।

(ii) सङ्केतोऽयं निर्दिशति यदत्र प्रवेश: निषिद्ध: अत: नात्र गन्तव्यम्।

(iii) ओवरटेक–निषेधकं चिह्नमुपदिशति यत्र अग्रगमन– प्रयत्नं निषिद्धम्।

**6.** यदा वाहन–चालक: सडक–सुरक्षा–नियमान् न पालयति तदा छात्रै: स: निरोधनीय, बोधनीय: विरोधनीय:। एषा उपेक्षा भावना च अवरोधनीया। तस्यायनुचित–व्यवहारस्य परिवाद: विद्यालयस्याधिकारिणां समक्षे निवेदनीय:। अधिकारिभि: असौ सम्यक् निर्देष्टव्य:। यद्यसौ पुनरपि करोति तदा परिवर्तनीय: अन्यथा आरक्षि– स्थाने परिवाद: प्रस्तोतव्य: स: यातायात– नियमानवगन्तु चं आदिष्टव्य:। छात्रै: शिक्षकै: अधिकारिभिश्चासौ उपेक्षणीय:।

**7.** केचन छात्रा: बालका: व अल्पायुसि एव वाहन–चालनाय अत्युत्सुका: भवन्ति। ते वाहन– चालनेऽनभिज्ञा अल्पज्ञा: वा सन्तोऽपि वाहनं नीत्वा राजमार्गे आगच्छन्ति। वाहन–चालनस्य प्रयत्न कुर्वन्ति एवं दुर्घटना सम्भवति अतोऽल्पायुसि बालकै: वाहन–चालन कार्यं न कुर्यात्।

षोडशदेश वर्षीया बालका: गियर (गतिपरिवर्तक) युक्त वाहनं न चालयेयु:। प्रशिक्षिता: अपि केचन बालका: आत्मविश्वासस्य अभावे असावधानतया दुर्घटनां विदधति। अत: आत्मविश्वास न त्यजेत् परञ्च वाहने चलदूरभाषै सङ्गीतं चापि न श्रणुयु सहयात्रिणा सह वार्तालापमपि न कुर्यु:।

**8.** राजमार्गस्य वामपार्श्वे एव चलेत्। व्यावर्तने: चतुष्पथे, पदातिमार्गे, गत्यावरोधके च वाहनं शनै: शनै: चालयेत। उभयत: संलग्नयो: आदर्शयो: मार्गस्थितिं विचरन्तश्च जनान् पश्येत्। व्यावर्तने हस्त-सङ्केत कुर्यात्। द्विचक्रवाहन चालकेन शिरस्त्राणम् (हैलमेट) अवश्यनेन धारणीयम्। यातायात संकेतान् अवलोक्य अभिज्ञाय, तेषाम् अभिप्राय प्रयोजनं वा ज्ञात्वा अनुपालयेत् राजमार्गविभाजिका पीत रेखा नोल्लङ्घनीया। वाहनोऽकस्मात् नावरोधनीय। पश्चगमने आदर्शयो स्थितिं जन-सम्मर्द च पश्येत सावहित: सन् चालयेत्।

**9.** 'प्रवेश निषेध' मार्गं न प्रविशेत्। यदि प्रविशति तदा किमपि दुर्घटितुं शक्यते। स्वस्यापरस्य व हानिर्भवितुं शक्नोति। तत्र नियुक्त: राज-पुरुष: निरोद्धं शक्नोति, वाहनस्य चालनं विधाय परिवादमपि आरब्धुं शक्नोति। अनेन आर्थिकहानि: तु भविष्यति एव मानसिक अशान्ति: अपि वर्धिष्यते। न्यायालय: दण्डयितु शक्नोति। अवमानना वाहनस्य क्षति: सम्भवति वाहनमपि निरोद्धुं शक्यते। अत: प्रवेश निषेध मार्गे प्रविष्टेतु अपाय एव सम्भवति।

**10.** राजमार्ग सङ्केता: मुख्यत: चतुर्धा: भवन्ति। एतेषु प्रवेश-निषेधादय: पञ्चत्रिंशत सङ्केता: अनिवार्या: भवन्ति एते वृत्ताकारेऽङ्किता: भवन्ति। सचेतका: सङ्केता: त्रिकोणात्मका: अङ्किता: भवन्ति, एते व्यावर्तनादिबोध् ाका: चत्वारिंशत् भवन्ति। सूचना चिह्नाणि विद्यमानता बोधकानि पञ्चदश संख्यकानि भवन्ति। चतुर्थ-विद्या दश सङ्केता: यातायात- कर्मकरस्य हस्ताभ्यां सङ्केतिता: भवन्ति। चतुष्पथे पुलिस कर्मकार: स्व हस्तयो: मार्गं, व्यावर्तक मार्गस्य रिक्ततां व्यस्ततां च दर्शयति।

●●